# Shivakshetreshu Sundarakrita Shivastutayah

# શિવક્ષેત્રેષુ સુન્દરકૃતા શિવસ્તુતયઃ

## Document Information

Text title : Shivakshetreshu Sundarakrita Shivastutayah

File name : shivakShetreShusundarakRRitAshivastutayaH.itx

Category : shiva, shivarahasya, tIrthakShetra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | sadAshivAkhyaH navamAMshaH | adhyAyaH 23 maheshvaraprasAdaH | vAvRRittashlokAH ||

Latest update : July 14, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 14, 2024

*sanskritdocuments.org*

# શિવક્ષેત્રેષુ સુન્દરકૃતા શિવસ્તુતયઃ

(શિવરહસ્યાન્તર્ગતે સદાશિવાખ્યે)
સુન્દરઃ ઉવાચ ।
(કમલાલયે પઞ્ચલિઙ્ગાનિ)
આનન્દેશ સુનન્દિત ત્રિભુવને મન્દારવૃન્દાનત
પાદાબ્જોત્થમરન્દસુન્દરમહાનન્દામ્બુવીચીસ્થિતઃ ।
મચ્ચિત્તાખ્યમિલિન્દ એવ નિતરાં પાતું તવાદ્યાદરા-
ન્નિન્દન્નર્થચતુષ્ટયં કલયતે પુણ્યેન્દિરાયાઃ પુરે ॥ ૫॥

સિદ્ધેશ સિદ્ધનિગમોત્તમમૌલિવાચા
મોચાસદૃક્ષવચસા ત્વયિ વિદ્ધિ ભાવમ્ ।
મુગ્ધેન્દુસિદ્ધસુલલામનિજાક્ષસોમ
મામદ્ય પાહિ ભવસિસિદ્ધિકરો મહેશ ॥ ૭॥

અચલાધિપરાજકન્યા(યકા)
કુચલીલાયિતવક્ષસા વિશાલ ।
નિટિલાનલદગ્ધપુષ્પબાણ
અચલેશાન નમામિ તે પદાબ્જમ્ ॥ ૯॥

અહિકટકાતિ પાદ દેવ મૌલિકોટી
વિલસદ્ગાઙ્ગજટોરુજૂટ પાહિ ।
નટનેન નિમગ્ન ભૂતલ
કરટિત્વક્કૃતચેલ હાટકેશ પાહિ ॥ ૧૧॥

ચન્દ્રાપીડકચોરુમૌલિમણિભા(સન્દીપ્તજૂટાન્તર-
પ્રોદ્યદ્) ગાઙ્ગતરઙ્ગસમ્ભવલસદ્રક્તોરુસદ્ધલ્લક ।
તત્રત્યોરુસમીરલોલિતમહાગન્ધાનુબન્ધોદ્યત-
દિગ્વક્ત્રાણિ પરાગિતાનિ હિ વિભો પાપાપહન્તૄણિ તે ॥ ૧૩॥

ત્વં શમ્ભુઃ કાલ્મલીકિઃ શ્રુતિ ગદિતયશા બિલ્મિનીબિલ્વપૂજ્યો

વલ્મીકોરુસુમધ્યસંસ્થિત મહાલિઙ્ગત્વદ(સમ)દ્રાક્ષિષમ્ ।
ધન્યસ્તેન સુરાદિમાન્યપદવીં પ્રાપ્તાં ચ મન્યે વિભો
કો વાઽન્યો હિ સમુદ્દિધીર્ષુરિહ માં સંસારસન્તારણે
(કોઽન્યો માં સમુજ્જીર્ષુરેવ ભગવન્સંસારસન્તારણે) ॥ ૧૪॥

ભવ ભૂતપતે ભવોદ્ભવાઘ
વિભવં ભાવુકમેવ તેઽનુભવમ્ ।
ભવસન્તરણાય શમ્ભવે
હર ભર્ગામલ ભીમ ભવ્ય પાહિ ॥ ૧૫॥

ભર્ગાનઙ્ગવિલોપિલોચન વિભો ગઙ્ગાવતંસોજ્જ્વલ-
જ્જ્વાલાક્ષાતુલ જાલકીલિતપુરં સઙ્કીલિતં તે ક્ષણાત્ ।
ઘૂર્ણન્તી ત્રિદશોરુઘોરપટલીભૂર્ણિઃ દૃશા તે વિભો
સમ્પૂર્ણં પુનરેવ તે હર વિભોઽપર્ણાપતે પાહિ મામ્ ॥ ૧૬॥

ગઙ્ગાતુઙ્ગતરઙ્ગ(સઙ્ગ) સુમહામૌલે કુરઙ્ગાઙ્કધૃક્
માતઙ્ગત્વગલઙ્કૃતાઙ્ગ ભુજગાભોગાઙ્ગસઙ્ગ પ્રભો ।
ઉક્ષાઙ્ગસ્થિત દિવ્યભસ્મલસિત ગઙ્ગાતરઙ્ગોલ્લસ-
ત્યાગાધીશમહોઽગજામુખકૃપાપાઙ્ગં ભજે શઙ્કરમ્ ॥ ૩૫॥

માતઙ્ગાનઙ્ગભઙ્ગં મુરરિપુહૃદયાનન્દસન્દોહદં તં ।
કુન્દેન્દુદ્યુતિરઞ્જિતં હૃદિ ભજે ત્યાગાધિપં શઙ્કરમ્ ॥ ૩૬॥

મદ્ભાગધેય નગજાર્ધકૃતાઙ્ગસઙ્ગ
સારઙ્ગરઞ્જિતકરં વરલિઙ્ગસઙ્ગ ।
હે નીલકણ્ઠ હૃદયે તવ પદ્મપાદં
ઉલ્લાસતાં હિ ભગવન્ હર ત્યાગરાજ ॥ ૩૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવક્ષેત્રેષુ સુન્દરકૃતા શિવસ્તુતયઃ સમ્પૂર્ણાઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । સદાશિવાખ્યઃ નવમાંશઃ । અધ્યાયઃ ૨૩ મહેશ્વરપ્રસાદઃ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . sadAshivAkhyaH navamAMshaH . adhyAyaH 23 maheshvaraprasAdaH . vAvRRittashlokAH ..

Notes:

Sundara સુન્દર; one of the sixty-three Nāyanāra-s, after being born in Pṛthvīloka પૃથ્વીલોક, worships and eulogizes Śiva શિવ at the several Śivakṣetra શિવક્ષેત્ર that had been enlisted

for him to be at by Śiva શિવ in order to be able to experience Śiva Sānnidhya શિવ સાન્નિધ્ય. Among these, at Kamalālaya કમલાલય, he prays at the Pañcaliṅgāni પઞ્ચલિઙ્ગાનિ; viz. Ānandeśa આનન્દેશ, Siddheśa સિદ્ધેશ, Acaleśa અચલેશ, Hāṭakeśa હાટકેશ and Valmīkeśa વલ્મીકેશ. He also eulogizes Maheśvara મહેશ્વર stationed to the right of Valmīkeśa વલ્મીકેશ.

Proofread by Ruma Dewan

*Shivakshetreshu Sundarakrita Shivastutayah*

pdf was typeset on July 14, 2024

Please send corrections to *sanskrit@cheerful.com*